# ॥ श्री राम कवचम् ॥
# Shri Ram Kavach

॥ ॐ गण गणपतये नमः ॥
। ॐ श्री रामाय तुभ्यं नमः ।

॥ अगस्तिरुवाच ॥
आजानुबाहुमरविन्ददळायताक्षाजन्म शुद्धरस हास मुखप्रसादम् ।
श्यामं गृहीत शरचाप मुदाररूपम् । रामं सराम मभिराम मनुस्मरामि ॥ १ ॥

श्रुणु वक्ष्याम्यहं सर्वं सुत्तिक्षण मुनिसत्तम ।
श्रीरामकवचं पुण्यं सर्वकाम प्रदायकम् ॥ २ ॥
अद्वैतानन्द चैतन्य शुद्ध सत्वैक लक्षणः ।
बहिरन्तः सुतीक्ष्णात्र रामचन्द्रः प्रकाशते ॥ ३ ॥

तत्व विद्यार्थिनो नित्यं रमन्ते चित्सुखात्मनि ।
इति रामपदे नासौ परब्रह्माभिधीयते ॥ ४ ॥
जयरामेति यन्नाम कीर्तयन् नाभिवर्णयेत् ।
सर्वपापैर्विनिर्मुक्तो याति विष्णोः परं पदम् ॥ ५ ॥

श्रीरामेति परं मन्त्रं तदेव परमं पदम् ।
तदेव तारकं विद्धि जन्म मृत्यु भयापहम् ॥ ६ ॥
श्री रामेति वदन् ब्रह्मभावमाप्नो त्यसंशयम् ॥ ७ ॥

ॐ अस्य श्री रामकवचस्य, अगस्त्य ऋषिः । अनुष्टुप् छन्दः ।
सीतालक्ष्मणोपेतः श्रीरामचन्द्रो देवता ।
श्री रामचन्द्र प्रसाद सिद्ध्यर्थं जपे विनियोगः ॥

अथध्यानं प्रवक्ष्यामि सर्वाभीष्ट फलप्रदम् ।
नीलजीमूत सङ्काशं विद्युद् वर्णाम्बरावृतम् ॥ १ ॥
कोमलाङ्गं विशालाक्षं युवानमतिसुन्दरम् ।

सीतासौमित्रि सहितं जटामकुट धारिणम् ॥ २ ॥

सासितूरण धनुर्बाण पाणिं दानव मर्दनम् ।
यदाचोरभये राजभये शत्रुभये तथा ॥ ३ ॥
ध्यात्वा रघुपतिं क्रुद्धं कालानल समप्रभम् ।
चीरकृष्णाजिनधरं भस्मोद्धूळित विग्रहम् ॥ ४ ॥

आकर्णाकृष्ट सशर कोदण्ड भुजमण्डितम् ।
रणे रिपून् रावणादीन् तीक्ष्णमार्गण वृष्टिभिः ॥ ५ ॥
संहरन्तं महावीरं उग्रं ऐन्द्र रथस्थितम् ।
लक्ष्मणाद्यैर्महावीरैर्वृतं हनुमदादिभिः ॥ ६ ॥

सुग्रीवद्यैर् माहावीरैः शैल वृक्ष करोद्यतैः ।
वेगात् करालहुङ्कारैः भुभुक्कार महारवैः ॥ ७ ॥
नदद्भिः परिवादद्भिः समरे रावणं प्रति ।
श्रीराम शत्रुसङ्घान् मे हन मर्दय घातय ॥ ८ ॥

भूतप्रेत पिशाचादीन् श्रीरामशु विनाशय ।
एवं ध्यात्वा जपेत् राम कवचं सिद्धि दायकम् ॥ ९ ॥
सुतीक्ष्ण वज्रकवचं श्रुणुवक्ष्याम्यहं शुभम् ।
श्रीरामः पातु मे मूर्ध्नि पूर्वे च रघुवंशजः ॥ १० ॥

दक्षिणे मे रघुवरः पश्चिमे पातु पावनः ।
उत्तरे मे रघुपतिः भालं दशरथात्मजः ॥ ११ ॥
भृवोर् दूर्वादळश्यामः तयोर्मध्ये जनार्दनः ।
श्रोत्रं मे पातु राजेन्द्रो दृशौ राजीवलोचनः ॥ १२ ॥

घ्राणं मे पातु राजर्षिः कण्ठं मे जानकीपतिः ।
कर्णमूले खरध्वंसी भालं मे रघुवल्लभः ॥ १३ ॥
जिह्वां मे वाक्पतिः पातु दन्तवल्यौ रघूत्तमः ।
ओष्ठौ श्रीरामचन्द्रो मे मुखं पातु परात्परः ॥ १४ ॥

कण्ठं पातु जगत् वन्द्यः स्कन्धौ मे रावणान्तकः ।
धनुर्बाणधरः पातु भुजौ मे वालिमर्दनः ॥१५॥
सर्वाण्यङ्गुळि पर्वाणि हस्तौ मे राक्षसान्तकः ।
वक्षो मे पातु काकुत्स्थः पातु मे हृदयं हरिः ॥१६॥

स्तनौ सीतापतिः पातु पार्श्वे मे जगदीश्वरः ।
मध्यं मे पातु लक्ष्मीशो नभिं मे रघुनायकः ॥१७॥
कौसल्येयः कटिं पातु पृष्टं दुर्गति नाशनः ।
गुह्यं पातु हृषीकेशः सक्थिनी सत्यविक्रमः ॥१८॥

ऊरू शार्ङ्गधरः पातु जानुनी हनुमत्प्रियः ।
जङ्घे पातु जगद्व्यापी पादौ मे ताटिकान्तकः ॥१९॥
सर्वाङ्गं पातु मे विष्णुः सर्वसन्धीननामयः ।
ज्ञानेन्द्रियाणि प्राणादीन् पातु मे मधुसूदनः ॥२०॥

पातु श्रीरामभद्रो मे शब्दादीन् विषयानपि ।
द्विपदादीनि भूतानि मत्सम्बन्धीनि यानि च ॥२१॥
जामतग्न्य महादर्पदळनः पातु तानि मे ।
सौमित्रि पूर्वजः पातु वागादीनीन्द्रियाणि च ॥२२॥

रोमाङ्कुराण्यशेषाणि पातु सुग्रीव राज्यदः ।
वाङ्मनो बुद्ध्यहङ्कारैः ज्ञानाज्ञान कृतानि च ॥२३॥
जन्मान्तर कृतानीह पापानि विविधानि च ।
तानि सर्वाणि दग्ध्वाशु हरकोदण्डखण्डनः ॥२४॥

पातु मां सर्वतो रामः शार्ङ्ग बाणधर : सदा ।
इति श्रीरामचन्द्रस्य कवचं वज्रसंमितम् ॥२५॥
गुह्यात् गुह्यतमं दिव्यं सुतीक्ष्ण मुनिसत्तमः ।
यः पठेत् श्रुणुयाद्वापि श्रावयेद् वा समाहितः ॥२६॥

स याति परमं स्थानं रामचन्द्र प्रसादतः ।

महापातकयुक्तो वा गोघ्नो वा भ्रूणहातथा ॥ २७ ॥
श्रीरमचन्द्र कवच पठनात् सुद्धि माप्नुयात् ।
ब्रह्महत्यादिभिः पापैः मुच्यते नात्र संशयः ॥ २८ ॥

**॥ इति श्री रामकवचं सम्पूर्णम् ॥**

allastrologysolutions.com